ग.त्र. श्रीमते रामानुजाय नमः यो नित्यमच्युतपदांबुजयुग्मरुक्मव्यामोहतस्तदितराणि तृणाय मेने अस्मद्गु
२ रोर्भगवतोस्य दयैकसिंधो रामानुजस्य चरणौ शरणं प्रपद्ये १ लक्ष्मीपतेर्यतिपतेश्च दयैकधाम्नो योसौ
पुरा समजनिष्ट जगद्धितार्थं प्राच्यं प्रकाशयतु वः परमं रहस्यं संवाद एष शरणागतिमंत्रसा
रः ॐ भगवन्नारायणाभिमतानुरूपस्वरूपरूपगुणविभवैश्वर्यशीलाद्यनवधिकातिशयासं
ख्येयकल्याणगुणगणां पद्मवनालयां भगवतीं श्रियं देवीं नित्यानपायिनीं निरवद्यां देवदेवदि
व्यमहिषीमखिलजगन्मातरमस्मन्मातरमशरण्यशरण्यामनन्यशरणः शरणमहं प्रपद्ये १

ग॰त्र॰ सौकुमार्यलावण्ययौवनाद्यनंतकल्याणगुणगणनिधिदिव्यरूपस्वाभाविकानवधिकातिशयज्ञा
नबलैश्वर्यवीर्यशक्तितेजःसौशील्यवात्सल्यमार्दवार्जवसौहार्दसाम्यकारुण्यमाधुर्यगांभीर्यौ
दार्यचातुर्यस्थैर्यधैर्यशौर्यपराक्रमसत्यकामसत्यसंकल्पकृतित्वकृतज्ञताद्यसंख्येयकल्या
णगुणगणौघमहार्णवस्वोचितविविधविचित्रानंताश्चर्यनित्यनिरवद्यनिरतिशयसुगंधनि
रतिशयसुखस्पर्शनिरतिशयौज्ज्वल्यकिरीटमकुटचूडावतंसमकरकुंडलग्रैवेयकहारके
यूरकटकश्रीवत्सकौस्तुभमुक्तादामोदरबंधनपीतांबरकांचीगुणनूपुराद्यपरिमितकल्याण

पारमार्थिकभगवच्चरणारविंदयुगलैकांतिकात्यंतिकपरभक्तिपरज्ञानपरमभक्तिकृतपरिपूर्णा

नवरतनित्यविशदतमानन्यप्रयोजनानवधिकातिशयप्रियभगवदनुभवजनितानवधिका

तिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकैंकर्यप्राप्त्यपेक्षया पारमार्थि

कीभगवच्चरणारविंदयुगलशरणागतिर्यथावस्थिताविरतास्तु मे अस्तु ते तयैव सर्वं संपत्स्यते

अखिलहेयप्रत्यनीककल्याणैकतान स्वेतरसमस्तवस्तुविलक्षणानंतज्ञानानंदैकस्वरूप

स्वाभिमतानुरूपैकरूपाचिंत्यदिव्याद्भुतनित्यनिरवद्यनिरतिशयौज्ज्वल्यसौंदर्यसौगंध्य

ग.च. रणभोगस्थानसमृद्धानंताश्चर्यानंतमहाविभवानंतपरिमाणनित्यनिरवद्यनिरतिशय श्रीवैकुंठ
२ नाथस्वसंकल्पानुविधायिस्वरूपस्थितिप्रवृत्तिस्वतंत्रशेषतैकस्वभावप्रकृतिपुरुषकालात्मक
विविधविचित्रानंतभोग्यभोक्तृवर्गभोगोपकरणभोगस्थानरूप निखिलजगदुदयविभवलय
3 लीलसत्यकामसत्यसंकल्पपरब्रह्मभूतपुरुषोत्तममहाविभूते श्रीमन्नारायणश्रीवैकुंठना
थअपारकारुण्यसौशील्यवात्सल्यौदार्यैश्वर्यसौंदर्यमहोदधे अनालोचितविशेषाशेषलो
कशरण्यप्रणतार्तिहरआश्रितवात्सल्यैकजलधेअनवरतविदितनिखिलभूतजातयाथात्म

२

दिव्यभूषणस्वानुरूपाचिंत्यदिव्यशक्तिशंखचक्रगदासिशार्ङ्गाद्यसंख्येयनित्यनिरवद्यनिरतिशयक
ल्याणदिव्यायुध स्वाभिमतनित्यनिरवद्यानुरूपस्वरूपगुणविभवैश्वर्यशीलाद्यनवधिकाति
शयासंख्येयकल्याणगुणगणश्रीवल्लभएवंभूत भूमिनीलानायक स्वच्छंदानुवर्तिस्वरूपस्थि
तिप्रवृत्तिभेदाशेषशेषतैकरतिरूपनित्यनिरवद्यनिरतिशयज्ञानक्रियैश्वर्याद्यनंतकल्याण
गुणगणशेषाशनगरुडप्रमुखनानाविधानंतपरिजनपरिचारिकापरिचरितचरणयुगल
परमयोगिवाङ्मनसापरिच्छेद्यस्वरूपस्वभावस्वाभिमतविविधविचित्रानंतभोग्यभोगोपक

देव पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् न त्वत्समोस्त्यभ्यधिकः कुतोन्यो लोकत्र
येप्यप्रतिमप्रभावः ४ तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यं पितेव पुत्रस्य
सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुं मनोवाक्कायैरनादिकालप्रवृत्तानंतानाकृत्यकरणकृ
4 त्याकरणभगवदपचारभागवतापचारासह्यापचाररूपनानाविधानंतापचारानारब्धका
र्यान नारब्धकार्यान्कृतान्क्रियमाणान्करिष्यमाणांश्च सर्वानशेषतः क्षमस्व अनादिका
लप्रवृत्तं विपरीतज्ञानमात्मविषयं कृत्स्नजगद्विषयं च विपरीतवृत्तं चाशेषविषयमद्यापि वर्त्त

अशेषचराचरभूतनिखीलनियमननिरत अशेषचिदचिद्वस्तुशेषिभूतनिखिलजगदाधार अखिल
जगत्स्वामिन् अस्मत्स्वामिन्सत्यकामसत्यसंकल्पसकलेतरविलक्षण अर्थिकल्पक आपत्स
खश्रीमन्नारायण अशरण्यशरण्य अनन्यशरणस्त्वत्पादारविंदयुगलंशरणमहंप्रपद्ये अत्र
द्वयं पितरंमातरंदारान्पुत्रान्बंधून्सखीन्गुरून् रत्नानिधनधान्यानिक्षेत्राणिचगृहाणि
च सर्वधर्मांश्चसंत्यज्यसर्वकामांश्चसाक्षरान् लोकविक्रांतचरणौशरणंतेव्रजंविभो त्वमे
वमाताचपितात्वमेवत्वमेवबंधुश्चगुरुस्त्वमेव त्वमेवविद्याद्रविणंत्वमेवत्वमेवसर्वंममदेव

मावंमांकुरुष्व परभक्तिपरज्ञानपरमभक्तिकृतपरिपूर्णानवरतनित्यविशदतमानन्यप्रयोजनाव
धिकातिशयप्रियभगवदनुभवोहं तथाविधभगवदनुभवजनितानवधिकातिशयप्रीतिकारि
ताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकिंकरोभवानि एवंभूतमत्कैंकर्यप्राप्त्युपायतया
५ वक्लृप्तसमस्तवस्तुविहीनोप्यनंततद्विरोधिपापाक्रांतोप्यनंतमदपचारयुक्तोप्यनंतमदीपा
पचारयुक्तोप्यनंतासह्यापचारयुक्तोप्येतत्कार्यकारणभूतानादिविपरीताहंकारविमूढात्मस्व
भावोप्येतदुभयकार्यकारणभूतानादिविपरीतवासनासंबद्धोप्येतदनुगुणप्रकृतिविशेषसंबं

प ९

मानैवर्निष्पनिमाणंचाशेषतः सर्वेक्ष्मसमस्तमशेषानादिकर्मप्रवाहदृष्टत्वाभगवत्स्वरूपनिरोधानक
रीविपरीतज्ञानजननीं स्वविषयायाश्चभोग्यत्वबुद्धेर्जननींदेहेन्द्रियत्वेनभोग्यत्वेनसूक्ष्मरूपेणवा
स्थितांदैवींगुणमयींमायांदासभूतः शरणागतोस्मि ने वास्मि इति वक्तारंमांनारायणेषां
ज्ञानीनित्ययुक्तएकभक्तिर्विशिष्यते प्रियोहिज्ञानिनोत्यर्थमहंसचममप्रियइत्यादिश्लोकत्रयो
दितत्वानितंमांकुरुष्व पुरुषःसपरः पार्थभक्त्यालभ्यस्त्वनन्यया भक्त्यात्वनन्ययाशक्योमद्भक्तिं
लभतेपरां २ इतिस्थानत्रयोदितपरमभक्तियुक्तंमांकुरुष्व परभक्तिपरज्ञानपरमभक्त्यैकस्व

रत

सैकप्रियः परिपूर्णो नवैनित्यविशुद्धतमानन्दप्रयोजना नवधिकातिशयप्रियमदनुभवस्त्वंतथाविध

मदनुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकिंक

६ रोभव ॥ एवंभूतोसि आध्यात्मिकाधिभौतिकाधिदैविकदुःखविघ्नगंधरहितस्त्वंद्वयमर्थानुसंधा

नेन सह सदैवं वक्ता यावच्छरीरपातमत्रैव श्रीरंगे सुखमास्स्व शरीरपातसमये तु केवलं मदीयैव

दययातिप्रबुद्धो मामेवावलोकयन्नप्रच्युतपूर्वसंस्कारमनोरथो जीर्णमिव वस्त्रं सुखेनेमां प्रकृ

तिं स्थूलसूक्ष्मरूपां विसृज्य तदानीमेव मत्प्रसादलब्धमच्चरणारविंदयुगलैकांतिकात्यंतिकप ६

ख

धोप्येनमत्वाध्यात्मिकाधिभौतिकाधिभौतिकाधिदैविकसुखदुःखद्वन्द्वेनहितिरोपेक्षणीयपादि
षयानुभवज्ञानसंकोचरूपमच्चरणारविंदयुगलैकैकांतिकात्यंतिकपर॰भक्तिपरज्ञानपरमभक्ति
विघ्नध्वनिरस्तोपियेनकेनापिप्रकारेणह्यवमुक्तास्त्वंकेवलंमदीयैवदयपयानिःशेषविनष्टानि
क्षमस्वेत्येकमच्चरणारविंदयुगलैकांतिकात्यंतिकपरभक्तिपरज्ञानपरमभक्तिविघ्नोमत्प्रसाद
लब्धमच्चरणारविंदयुगलैकांतिकात्यंतिकपरभक्तिपरज्ञानपरमभक्तिर्मत्प्रसादादेवसाक्षान्कृ
नयथावस्थितमत्स्वरूपरूपगुणविभूतिलीलोपकरणवीस्तारोपरोक्षसिद्धिमत्प्रियाम्यनयामद्

गद्वितार्थे ध्राव्येण्वकाशयन्तुवःपरमंरहस्यंसंवादरूपेणशरणागतिमंत्रसारः इतिशरणागतिगद्यं

२ अंतकालेस्मृतिर्यातुतवकैंकर्यकारिता नामेनांभगवन्नद्यक्रियमाणंकुरुष्वमे यामुनार्यसु

धांभोधिमवगाह्ययथामति आदायभक्तियोगाख्यंरत्नंसंदर्शयाम्यहं स्वाधीनत्रिविधचेतनाचेत

नस्वरूपस्थितिप्रवृत्तिभेदं क्लेशकर्माद्यशेषदोषासंस्पृष्टंस्वाभाविकानवधिकातिशयज्ञानबलै

श्वर्यवीर्यशक्तितेजःसौशील्यवात्सल्यमार्दवार्जवसौहार्दसाम्यकारुण्यमाधुर्यगांभीर्यौदार्यचा

तुर्यस्थैर्यधैर्यशौर्यपराक्रमसत्यकामसत्यसंकल्पकृतित्वकृतज्ञताद्यसंख्येयकल्याणगु

र्मक्तिपरज्ञानपरमभक्तिकृतपरिपूर्णानवरतनित्यविशदतमानन्यप्रयोजनानवधिकातिशयप्रियमदनु
भवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकिंकरोभविष्यसि
मातेभूदत्रसंशयः अनृतंनोक्तपूर्वंमेनचवक्ष्येकदाचनरामोद्विर्नाभिभाषते सकृदेवप्रपन्नाय
तवास्मीतिचयाचते अभयंसर्वभूतेभ्योददाम्येतद्व्रतंमम सर्वधर्मान्परित्यज्यमामेकंशरणंव्र
ज अहंत्वासर्वपापेभ्योमोक्षयिष्यामिमाशुचइतिमयैवह्युक्तं अतस्त्वंतवतत्त्वतोमज्ज्ञानदर्श
नप्राप्तिषु निःसंशयः सुखमास्व लक्ष्मीपतयेतिश्रद्वैकधाम्नोयौमोप्रणासमजनिष्ज

सम्यक्ज्ञानतदुपायसमीचीनक्रियातदनुगुणसात्विकतास्तिक्यादिसमस्तात्मगुणविहीनोदुरुत्तरा
नंततद्विपर्ययज्ञानक्रियानुगुणानादिपापवासनामहार्णवांतर्निमग्नस्तिलतैलवद्दारुवह्निवद्दु
र्विवेचत्रिगुणक्षणक्षरणस्वभावाचेतनप्रकृतिव्याप्तिरूपदुरत्ययभगवन्मायातिरोहितस्वप्रका
8 शोनाद्यविद्यासंचितानंताशक्यविस्रंसनकर्मपाशप्रग्रथितोनागतानंतकालसमीक्षयाप्य
दृष्टसंतारोपायोनिखिलजंतुजातशरण्यश्रीमन्नारायणतवचरणारविंदयुगलंशरणमहं
प्रपद्ये एवमवस्थितस्याप्यर्थित्वमात्रेणपरमकारुणिकोभगवान्स्वानुभवप्रीत्योपनीतैकांतिका ८

णगणौघमहार्णवं परब्रह्मभूतं पुरुषोत्तमं श्रीरंगशायिनमस्मत्स्वामिनं प्रबुद्धनित्यनियाम्यनित्य
दास्यैकरसात्मस्वभावोऽहं तदेकानुभवस्तदेकप्रियः परिपूर्णं भगवन्तं विशदतमानुभवेन नि
रंतरमनुभूय तदनुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरति
रूपनित्यकिंकरो भवानि २ स्वात्मनित्यनियाम्यनित्यदास्यैकरसात्मकस्वभावानुसंधानपूर्वकं भ
गवदनुभवजनितानवधिकातिशयस्वाम्याद्यखिलगुणगणानुभवजनितानवधिकातिशय
प्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकैंकर्यप्राप्त्युपायभूतभक्तितदुपा

चिदचिद्वस्तुशेषिभूतनिखिलजगदाधार अखिलजगत्स्वामिन्नस्मत्स्वामिन्सत्यकामसत्यसंकल्पसक
लेतरविलक्षण अर्थिकल्पक आपत्सख काकुत्स्थ श्रीमन्नारायण श्रीपुरुषोत्तम श्रीरंगनाथ मम नाथ
१ नमोस्तु ते अनंतानंतशायन पुराणपुरुषोत्तम रंगनाथ जगन्नाथ नाथ तुभ्यं नमोस्तु ते इति श्रीरंगरा
जप्रार्थनागद्यं २ यामुनार्यसुधांभोधिमवगाह्य यथामति आदाय भक्तियोगाख्यं रत्नं संदर्शया
म्यहं स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदं क्लेशकर्माद्यशेषदोषासंस्पृष्टं स्वाभा
विकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःप्रभृत्यसंख्येयकल्याणगुणगणौघमहार्ण

न्यंतिकंकैंकर्यैकरतिरूपनित्यदास्यं दास्यतीति महाविश्वासपूर्वकं भगवंतं नित्यकिंकरतां प्रार्थयेत
वानुभूतिसंभूतप्रीतिकारितदासतां देहि मे कृपया नाथ भजाने गतिमन्यथा सर्वावस्थोचिताशे
षशेषतैककरतिस्तव भवेयं पुंडरीकाक्ष त्वमेवैवं कुरुष्व मां एवंभूततत्त्वयाथात्म्यावबोधतदिच्छार
हितस्यात्येतद्धारणमात्रावलंबनेनोक्तमानार्थपरमार्थौ निष्कर्म मनस्त्वमेवाद्यैव कारय. अपा
रकरुणांभोधे अनालोचितविशेषाशेषलोकशरण्यप्रणतार्तिहर आश्रितवात्सल्यैकजलधे
अनवरतविदितनिखिलभूतजातयाथात्म्याशेषचराचरभूतनिखिलनियमननिरता शेष

भुजङ्गेन ननन्तस्वप्रसूक्ष्मात्मोऽजीवनायैवमनुस्मरेन चतुर्दशभुवनात्मकमंडं दशगुणितोत्तरं चावरणांस
सकं समस्तकार्यकारणजातमतीत्यवर्तमाने परमव्योमशब्दाभिधेये ब्रह्मादीनां वाङ्मनसागोचरे स्वी
मन्निवैकुंठेद्दिव्यलोके सनकसनंदनविधिशिवादिभिरप्यचिंत्यस्वरूपस्वभावैश्वर्यैर्नित्यसिद्धैरनंतैर्भग
20 वदानुकूल्यैकभोगैर्दिव्यपुरुषैर्महात्मभिरापूरिते तेषामपि इयत्परिमा
णमियदैश्वर्यमीदृशं स्वभावमिति परिछेत्तुमयोग्ये दिव्यकल्याणरूपशोभिते दिव्योद्यानशतसहस्र
कोटिभिरावृते अतिपरिमाणे दिव्यायतने कस्मिंश्चिद्विचित्रदिव्यरत्नमये दिव्यस्थानमंडपे दिव्यरत्ने १०

वं परमपुरुषं भगवंतं नारायणं स्वामित्वेन गुरुत्वेन सुहृत्वेन च परिगृह्यैकांतिकात्यंतिकतत्पादांबुजद्व
यपरिचर्यैकमनोरथस्तत्प्राप्तये च तत्पादांबुजद्वयप्रपत्तेरन्यन्न मे कल्पकोटिसहस्रेणापि साधन
मस्तीति मन्वानस्तस्यैव भगवतो नारायणस्याखिलसत्वदयैकसागरस्यानालोचितगुणगणाखं
डजनानुकूलमर्यादाशीलवतः स्वाभाविकानवधिकातिशयगुणवत्तया देवतिर्यङ्मनुष्याद्यखिल
जनहृदयानंदनस्य आश्रितवात्सल्यैकजलधेर्भक्तजनसंश्लेषैकभोगस्य नित्यज्ञानक्रियैश्वर्यभोगसा
मग्रीसमृद्धस्य महाविभूतेः श्रीमच्चरणारविंदयुगलमनन्यात्मसंजीवनेन तद्गतसर्वभावेन शरणम

णिमुक्ताप्रवालकृतसोपाने दिव्यामलामृतरसोदकैर्दिव्यांडजवैरैरतिरमणीयदर्शनैरतिमनोहरम
धुरस्वैरैराकुलैरंतस्थमुक्तामणिमयदिव्यक्रीडास्थानोपशोभिते दिव्यराजहंसावलिभिर्विराजि
ते राहूते निरलातिशयानंदैकरसतयाचानंत्याव्रवप्रविक्षानुन्मादवद्भिः क्रीडोद्देशैर्विराजिते राह
11 ते नवनवकृतदिव्यपुष्पपर्यंकायशोभिते नानापुष्परसास्वादमत्तभृंगावलिभिरुद्गीय
मानदिव्यगांधर्वेणापूरिते चंदनागरुकर्पूरदिव्यपुष्पावगाहिमंदानिलसेव्यमानेमध्येदिव्य
पुष्पसंचयविचित्रमहातिदिव्ययोगपर्यंक स्वनंतभोगिनी श्रीमद्वैकुंठैश्वर्यादिदिव्यमालमकं

११

स्तंभशतसहस्रकोटिभिः शोभिते दिव्यनानारत्नकृतस्थलविचित्रीते दिव्यालंकारालंकृतैपरितः पतनैःप
तमानैः पादपस्यैश्च नानागंधवर्णैर्दिव्यपुष्पैः शोभमानैर्दिव्यपुष्पोपवनैरुपशोभिते संकरीपा
रिजातादिकल्पद्रुमोपशोभितैरसंकीर्णैश्चकैश्चिदंतस्थपुष्परत्नादिनिर्मितदिव्यलीलामंडप
शतसहस्रकोटिभिरुपशोभिते सर्वदानुभूयमानैरप्यपूर्ववदाश्चर्यमावहद्भिः क्रीडाशैलशत
सहस्रैरलंकृतै नारायणदिव्यलीलासाधारणैश्चकैश्चित्पद्मवनालयादिदिव्यलीलासाधारणैश्च
कैश्चिच्छुकसारिकामयूरकोकिलादिभिः कोमलकूजितैराकुलैर्दिव्योद्यानशतसहस्रैरावृतैर्म

मलगंधुसुगंसंलस्रात्पर्येन विलंवितालकं उदयपीनांसचीलंविलंयिकुंडलालकावलिवंधुरकंव
कंधरं प्रियावंतंसोत्पलकराभूषणाश्लथालकावंधविमर्दशंहिभिः चतुर्भिराजानुविलंविभिर्भु
जैर्विराजितं श्रीति कोमलदिव्यरेखावालंकृताताताम्रकरतलदिव्यांगुलीयकैर्विराजितं श्रीति
कोमलदिव्यनखावलिविराजितातरक्तांगुलीभिरलंकृतं तत्क्षणोन्मीलितपुंडरीकदृग्धचरण
12 युगलं श्रीति मनोहरकिरीटमकुटचूडावतंससमकरकुंडलग्रैवेयकहारकेयूरकटकश्रीवत्सको
स्तुभमुक्ताहासोदरवंधनपीतांवरकांचीगुणनूपुरादिभिरत्यंतसुखस्पर्शैर्दिव्यगंधैर्भूषणोभूषितं १२

त्याविश्रमाप्यापयंत्याशेषघोषासनादिसर्वपरिजनंभगवन्तंनन्दनस्योचितपरिचर्य्यायामाज्ञापयं
त्याशीलरूपगुणविलासादिभिरात्मानुरूपयाश्रियासहासीनंप्रत्यग्रोन्मीलितसरसिजसदृशनय
नयुगलंस्वच्छनीलजीमूतसंकाशमत्युज्ज्वलपीतवाससंस्वयाप्रभयातिनिर्मलयात्यतिकोमल
यातिशीतलयास्वच्छमाणिक्यप्रभयाकृत्स्नजगद्भासयंतं अचिंत्यदिव्याद्भुतनित्ययौवनंस्वभा
वलावण्यमयामृतसागरमतिसौकुमार्यादीषत्प्रस्विन्नवदालक्ष्यमाणललाटफलकंदिव्या
लकावलिविराजितं प्रबुद्धमुग्धांबुजचारुलोचनंसविभ्रमभ्रूलतमुज्ज्वलाधरंशुचिस्मितंको

यंतंभगवंतंनारायणंध्यानयोगेनदृष्ट्वाततोभगवतोनित्यस्वाम्यमात्मनोनित्यदास्यंचयथाव
स्थितमनुसंधायकदाहंभगवंतंनारायणंममनाथंममकुलदैवतंममकुलधनंममभीग्यं
मममातरंममपितरंममसर्वंसाक्षात्करवाणिचक्षुषाकदाहंभगवत्पादांबुजद्वयंशिरसासंग्रही
13 ष्यामिकदाहंभगवत्पादांबुजद्वयपरिचर्याशयानिरस्तसमस्तेतरभोगाशोपगतसमस्तसांसा
रिकस्वभावः प्रस्तुहंतिमतिपाम्पनित्यदास्यैकरसात्मस्वभावस्तत्पादांबुजद्वयपरिचर्याकरणं
योग्यस्तदेकभोगस्तत्पादौपरिचरिष्यामिकदामांभगवान्स्वकीययातिशीतलयादृशावलो
क्यस्निग्धगंभीरमधुरयागिरापरिचर्यायामाज्ञापयिष्यति इतिभगवत्परिचर्यायामाशांवर्द्धयि १३

श्रीमत्यावैजयंत्यावनमालयाविराजितं शंखचक्रगदासिशांर्ङ्गादिदिव्यायुधैः सेव्यमानं सकलज्ज
गत्सृष्टिस्थितिध्वंसादिके श्रीमद्विष्वक्सेनेनान्यस्तसमस्तात्मैश्वर्यं वैनतेयादिभिः स्व
भावतो निरस्तसमस्तसांसारिकस्वभावैर्भगवत्परिचर्याकरणयोग्यैर्भगवत्परिचर्यैकभोगै
नित्यसिद्धैरनंतैर्यथायोगं सेव्यमानमात्मयोगेनानुसंहितपरादिकालं दिव्यामलकोमलाव
लोकनेन विश्वमाल्हादयंतमीषदुन्मीलितमुखांबुजविनिर्गतेन दिव्यनयनारविंदशोभा
जननेन दिव्यगांभीर्यौदार्यसौंदर्यमाधुर्य्याद्यनवधिकातिशयगुणगणविभूषि
तेनातिमनोहरदिव्यभावगर्भितेन दिव्यलीलालापामृतेनाखिलजनहृदयांतराण्यापूर

म०
२३
13B

यंतंभगवंतंनारायणंध्यानयोगेनदृष्ट्वा ततोभगवतोनित्यस्वाम्यमात्मनोनित्य
दासंचयथास्थितमनुसंधायकदाहंभगवंतंनारायणंममनाथंममकुलदैवतंम
मकुलधनंममभोग्यंममम्मातरंममसर्वंसाक्षात्करवाणिचक्षुषा कदाहंभगवत्पा
दांबुजद्वयंशिरसासंग्रहीष्यामि कदाहंभगवत्पादांबुजद्वयपरिचर्याशयानिरस्त
समस्तेतरभोगाशोपगतसंसारिकस्वभावः प्रबुद्धातित्यातिपाम्य नित्यदास्यैक
रसात्मस्वभावस्त्यादांबुजद्वयपरिचर्याकरणयोग्यस्तदेकभोगस्तत्पादौपरिचरि
ष्यामिकदामांभगवान्स्वकीययातिशीतलयादृशावलोक्यस्निग्धगंभीरम

राम:

श्रीमत्या वैजयंत्या वनमालया विराजितं शंखचक्रगदासिशार्ङ्गादिदिव्यायुधैः सेव्यमानं
स्वसंकल्पमात्रावक्लृप्तजगज्जन्मस्थितिध्वंसादिके श्रीमद्दिव्यके नोन्यसमस्तसांतानैश्वर्यं
वैनतेयादिभिः स्वभावतो निरस्तसमस्तसांसारिकस्वभावैर्भगवत्परिचर्याकरणयोग्यै
र्भगवत्परिचर्यैकभोगैर्नित्यसिद्धैरनंतैर्यथायोगं सेव्यमानमात्मभोगेनानुसंहितपरा
दिकालं दिव्यामलकोमलावलोकनेन विश्वमाह्लादयंतमीषदुन्मीलितमुखांबुज
विनिर्गतेन दिव्याननारविंदशोभाजननेन दिव्यगांभीर्यौदार्यसौंदर्यमाधु
र्याद्यनवधिकगुणगणविभूषितेनातिमनोहरदिव्यभावगर्भि
तेन दिव्यलीलालापामृतेनाखिलजनहृदयांतराण्यापूरयं ० श्री ह्ललरीवः॥

नः किंकुर्वाणः कृतांजलिपुटो भगवन्तमुपासीनस्तमनुभूयमानभावविशेषो निरतिशयप्री
त्यान्यत्किंचित्कर्तुं द्रष्टुं स्मर्तुमशक्तः पुनरपि शेषभावमेव याचमानो भगवंतं तमेवाविच्छिन्नस्रो
तोरूपेणावलोकनेनावलोकयन्नासीनस्ततो भगवतास्वयमेवात्मसंजीवनेनावलोकनेनाव
15 लोक्य सस्मितमाहूय समस्तक्लेशापहं निरतिशयसुखावहं स्वात्मीयं श्रीमत्पादारविंदयु
गलं शिरसि कृतं ध्यात्वामृतसागरांतर्निमग्नसर्वावयवस्सुखमासीत शारीरकेवस्मिभाष्यप्र
गोपिता परमा गतिः श्रीवगद्यत्रये व्याख्यानं तां विद्याव्रणनोऽस्म्यहं २ लक्ष्मीपतेर्यतिपतेश्च

त्वानयैवाशयानन्तप्रसादोपबृंहितयाभगवंतमुपेत्यदूरादेवभगवंतंशेषभोगेश्रियासहासीनंवैन
तेयादिभिःसेव्यमानसमस्तपरिवारायश्रीमतेनारायणायनमःइतिप्रणम्योत्थायोत्थायपु
नःपुनःप्रणम्यात्यंतसाध्वसविनयावनतोभूत्वाभगवत्पार्षदगणनायकेद्वारपालकैःकृपया
स्नेहगर्भयादृशावलोकितःसम्यगभिवंदितैस्तैवाभिमतोभूत्वाभगवंतमुपेत्यश्रीमतामू
लमंत्रेणममैकांतिकात्यंतिकपरिचर्याकरणायपरिगृह्णीष्वेतियाचमानःप्रणम्यात्मानंभगव
तेनिवेदयेत्ततोभगवतामर्यादशीलवतातिप्रेमान्वितेनावलोकनेनावलोक्यसर्वदेशसर्व
कालसर्वावस्थोचितात्यंतिकशेषभावायस्वीकृतोनुज्ञातश्चात्यंतसाध्वसविनयावन

हृद्यैकधाम्नोयोसौपुरासमजनिक्षिजगद्धितार्थं ग्रायंप्रकाशयतुनः परमंरहस्यंसवादरएषश्री
रंगाभिधमंत्रसारः २ वेदवेदांततत्त्वानांतत्त्वयाथात्म्यवेदिने रामानुजायमुनयेनमोस्मग
रीयसे ३ वेदवेदांतकर्पूरचामीकरकरंडकं रामानुजार्यमार्याणां चूडामणिमहन्निशं ४ त
15 ल्लीकृतविरिंच्यादिनिरंकुशविभूतयः रामानुजपदांभोजसमाश्रयणशालिन ५ इतिश्रीम
त्परमहंसपरिव्राजकाचार्य्यश्रीमद्भगवद्रामानुजाचार्य्यविरचितंश्रीवैकुंठगद्यंपरिसमाप्तं